International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(1): 50-51
© 2019 IJSR
www.anantaajournal.com
Received: 23-11-2018
Accepted: 25-12-2018

डॉ0 परमेश्वर साहु
बथनाहा, तमुरिया, मधुबनी, बिहार, भारत

Corresponding Author:
डॉ0 परमेश्वर साहु
बथनाहा, तमुरिया, मधुबनी, बिहार, भारत

# शब्दशास्त्रस्य महत्त्वम्

**डॉ0 परमेश्वर साहु**

**सारांश:**
भाषायाः शुद्धता व्याकरणशास्त्राधीना भति। संस्कृतभाषायाः अनेकेषु वैशिष्ट्येषु व्याकरणपरिनिष्ठितत्त्वम् अन्यतममिति सुविदितमेतत्। यथा अस्याः भाषायाः व्याकरणसम्पत्तिः वर्तते तथा नान्यस्याः भाषायाः।
वि–आङ्पूर्वक कृधातोः ल्युटिकृते सति अनुबन्धलोपे अनादेशे गुणे रपरे णत्वे कृते च निष्पन्नं यद्व्याकरणपदं तस्य कोऽर्थः इत्यत्रोच्यते व्याक्रियते व्युत्पाद्यते प्रकृतिप्रत्ययभिागतत्तदर्थविभागतत्तदन्वयबोधविषयकज्ञानम् येन तद्व्याकरणम् नाम प्रत्ययादिविभागतत्तदर्थभिागतत्तदन्वयबोध (शाब्दबोध) विषयकपदार्थज्ञानरूपा या व्युत्पत्तिः तत्साधनमित्यर्थः तथाहि–

**विविक्ताः साधवः शाब्दाः प्रकृत्यादिविभागतः।**
**ज्ञाप्यते येन तच्छास्त्रमत्र शब्दानुषासनम्।।**

अस्य शास्त्रस्य वैशिष्ट्यनिरूपणे शेषोऽपि अशेषजिह्वया पारं न याति किमधिकं वदामो वयं शिष्टोक्तिः स्मर्यते।

**काणादं पाणिनीयञ्च सर्वषास्त्रोपकारकमिति।**

ततोप्युत्कृष्टतमं महत्तं भाष्यकारेण प्रतिपादितम्महीभाष्ये–

**रक्षार्थं वेदानामव्येयं व्याकरणम्**

अयम्भावः वेदरक्षायै व्याकरणमावश्यकम् अर्थात् व्याकरणज्ञानमन्तरेण वेदे नैपुण्यत्वं न याति अतः वेदरक्षायै सम्यक तया निष्कामभोन अध्येयम् अस्माभिः व्याकरणम्।
अस्य वेदेन सार्धम् अङ्.गाङ्.गीभावत्वं वर्तते तथाहि–
प्रधानं च षट्स्वङ्.गेषु व्याकरणम् प्रधाने कृते यत्नः फलवान् भवन्ति। इत्यत्राङ्.गत्वं नाम उपकारकत्वं ज्ञातव्यम्।
सन्दर्भेऽस्मिन् भट्टोजीदीक्षितेन स्वीये शब्दकौस्तुभे प्रत्यपादि।
तेषपि प्रधानं व्याकरणं, पदार्थावगमस्य व्याकरणाधीनत्वात् वाक्यार्थज्ञानस्य च तन्मूलत्तवात्। अत एव तस्य शिक्षायां मुखत्वेन निरूपणं कृतम्।
अयं भावः सकलशास्त्राध्ययने व्याकरणाध्ययनं परमावश्यकम्। अध्येतृषु अस्यशास्रस्य अध्ययनानन्तरमेव अन्यशास्त्राध्ययनाधिकारित्वमुपपद्यते तत्र सिद्धान्तशिरोमणिकारः–

**"यो वेद वेदवदनं सदनं हि सम्यक्**
**ब्रह्मायाः स वेदमपि वेद किमन्यषास्त्रम्।**
**यस्यादमेतदतः प्रथममेतदधीत्य धीमान्**
**शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।"** [1]

असाधुशब्दानां परित्यागः अभीष्टार्थानां प्रतिपादनाय विद्वद्गोष्ठीषु अनुपहासाय च हदं शास्त्रमेव शरणम् तथात्र भर्तृहरिः–

**साधुत्वज्ञानविषया सैषाव्याकरणस्मृतिः।**
**तत्त्वाबोधः शब्दानां नास्तिव्याकरणादृते।।** [2]

यथा चन्द्रिका घटपटादीनि वस्तूनि प्रकाशयति तथा इदं शास्त्रं प्रकृतिप्रत्ययादि शब्दस्वरूपाणि तदर्थांश्च प्रकाशयति। न केवलं प्रकृति प्रकृतिप्रत्ययादिशब्दस्वरूपप्रकाशकमिदं शास्त्रमपितु अस्माटृते भुवनत्रयमिदं तमसा आृत्तमेव भवेत्।

अत्र दण्डी–

**इदमन्धतनः कृत्स्त्रं जायते भुनत्रयम्।**
**यदि शब्दाह्वयं ज्योति रासंसारं न दीप्य ते।।** [3]

खलु शब्दानामर्थप्रृत्तिः व्याकरणनिष्ठा वर्तते। तथाहि भर्तृहरिः–

**अर्थप्रवृत्तितत्तनां शब्दा एवनिबन्धनम्।**
**तत्त्वावबोधः शब्दानां नास्तिव्याकरणमाटृते।** [4]

अतः दण्डी वचनं सर्वथा सूपयुक्तम्। फलतः ऋक्प्रातिशाख्यस्यापरं नाम ऋक्लक्षणमस्ति । प्रातिशाख्यस्य विधिवदध्ययनकत्तैवाचार्यपदस्याधिकारी भवति नान्यदिति। अस्मिन् विषये ऋक् प्रातिशाख्यस्य स्पष्टकथनमस्ति –

**''पदक्रमविभागज्ञो वर्णक्रमविचक्षणः ।**
**स्वरमात्राविशेषज्ञो गच्छोदाचार्यसम्पदम् ।।** [5]

तेन हि प्रातिशाख्यस्यानुशीलनं वेदस्याचार्यपदसम्पादनाय प्राथमिकाऽऽवश्यकता वर्त्तत। प्रातिशाख्यानामध्ययनेन ज्ञातो भवति यत्तासु शाखासु वसयाप्येकस्यैव शाखानियमानां निर्देशो नास्ति, अपितु, तासु, एकैवस्य चरणस्य शास्त्रा– नियमानामुल्लेखौ मिलति। महर्षिणा यास्केन कथितम् –'पदप्रकृतिनि सर्वचरणानां पार्षदानि [6] परिष्दाना प्रातिशाख्यञ्च सम्बन्धः चरणैः सह सिद्धो भवति। प्रातिशाखा शब्द : चरणायैव व्यवहृतः प्रतीतो भवति। साम्प्रतिकं शाखाशब्दाय विष्णुपुराणे अनुशाखाशब्दस्य प्रयोग मिलति [7]–
प्रातिशाख्यस्य विषये उवटकृतस्य ऋक्प्रातिशाख्याभाषस्यारम्भे पद्यमिदमुपलब्धं भवति, येनास्याः प्रयोजनस्य परिचयो मिलति–

**'शिक्षा छन्दो व्याकरणैः सामान्येनोक्त लक्षणम् ।**
**तदेवमिह शाखायामिति शास्त्रप्रयोजनम् ।।** [8]

अयमाशयोऽस्ति शिक्षा छन्दो व्याकरणयोः सामान्यनियमस्य वर्णनं करोति । ते एवनियमाः तत्तद्वैदिकवेदशाखायां केन प्रकारकेणास्ति अस्य कथनमेव प्रातिशाख्यस्य मूलप्रयोजनमस्ति निष्कर्षोऽयमस्ति यत् प्रातिशाख्यस्थक्षेत्रं पूर्वोक्तानि प्रति वेदात्रनि समाहरति तथा तस्य विशिष्टशाखायां तत्तद्विशेषनियमानां विवरणं प्रस्तौति । प्रातिशाख्यां पूर्वोक्तस्य वेदात्रत्रितयस्य नियमानां विशेषरूपेण व्यवस्थापकमस्ति। शिक्षा छन्द व्याकरणेषु यस्य नियमस्य विधानमस्मिन् भिन्ननियमानां विधानमस्मिन् शास्त्रे भवति। एवं विधा विषयाः सन्ति –पद –क्रमहेतु पारायणादयः प्रातिशाख्यमिदं कस्यापि शास्त्रस्याद्यकथनेनास्य पूर्णताया ह्रासो भवति। इयमस्ति अनिन्द्यम् आर्ष पूर्णवेदात्रड्.गचेति । स्वं मुनिना शौनकेन कथितम् –

**'कृत्स्नं च वेदात्रनिन्द्यमार्षम् ।'**

वैदिकवाड्मये मन्त्राणां शुद्धोच्चारणाय शिक्षाप्रातिशाख्ययोः स्थानमन्यतमं विद्यते। वेदात्रेष्वपि शिक्षायाः महत्त्वं सम्यगर्थावबोधनाय अतीव महत्वपूर्णमस्ति। ऋग्वेदभाष्यभूमिकायां यथाह्युक्तं सायणाचार्येण–

**'स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा।'**

वैदिकस्वराणां परिज्ञानाय शिक्षाग्रन्थस्याध्ययनमावश्यकमस्ति। वेदे स्वरस्य प्राधान्यं सुविदितमेव। शिक्षाशास्त्रस्य प्रयोजनमुक्तं तैत्तिरीयोपनिषदारम्भे। यथा–'अथ शिक्षां व्याख्याष्यामः–वर्णः, स्वरः, मात्रा, बलम्, साम सन्तान् इत्युक्तः शिक्षाध्यायः। वेदार्थपरिज्ञाने वर्णपरिचयो नितरामपेक्षितो भवति। स्वराः उदात्तानुदात्तस्वरितादयः, मात्रा स्वरोच्चारणे प्रयोज्यमानः कालः। ह्रस्वदीर्घाप्लुतभेदेन च त्रिविधा भवति। बलेन स्थानप्रयत्नयोर्बोधो भवति।
स्वरव्य×जनयोरूच्चारणकाले ताल्वादि यत्स्थानस्य वायुना सह स्पर्शो भवति तथैव स्थानमिति। प्रयत्नोऽपि द्विधा भवति आभ्यन्तरो वाह्यश्चेति। स्पृष्ट–ईषत्स्पृष्ट–विवृत–संवृत भेदात् चतुर्धा विभज्यन्ते आभ्यन्तरप्रयत्नः। वाह्यप्रयत्नोऽपि एकादशधा– विवार– संवार– श्वास–नाद–घोष–अघोष अल्प्राण–महाप्राण– उदात्तानुदात्त–स्वरितश्चेति। साम–साम्यम्। निर्दुष्टं माधुर्यगुणयुतीच्चारणं साम्यम्।
अतएव वैदिकस्वराणां परिज्ञानाय, शुद्धस्वरोच्चारणपूर्वकं यज्ञादि फललाभाय, भाषाशिक्षणाय च वैदिकव्याकरणस्य लौकिकव्याकरणस्य च सम्यक् ज्ञानप्राप्तये च व्याकरणस्य स्थानं महनीयमस्तीति।

**संदर्भाः**

1. गोलाध्यायः श्लोः – 8 ।
2. वाक्यापदीयम् ब्रह्मकाण्ड श्लो0 – 142 ।
3. वाक्यापदीयम् ब्रह्मकाण्डे ।
4. ऋक्प्रातिशाख्यम्–8 ।
5. निरुक्तम्– 1/17 ।
6. विष्णुपुराणम्– 3/4 ।
7. ऋग्वेदप्रतिशाख्यम् ।
8. ऋग्वेदप्रतिशाख्यम्–14/69 ।